# Shivastuti by Rati

# રતિકૃતા શિવસ્તુતિઃ

## Document Information

Text title : shivastutiH 5 by rati

File name : shivastutiHrati.itx

Category : shiva

Location : doc_shiva

Transliterated by : Jonathan Wiener wiener78 at sbcglobal.net

Proofread by : Jonathan Wiener wiener78 at sbcglobal.net, NA

Latest update : December 31, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# રતિકૃતા શિવસ્તુતિઃ

નમઃ શિવાયાસ્તુ નિરામયાય નમો શિવાયાસ્તુ મનોમયાય ।
નમઃ શિવાયાસ્તુ સુરાર્ચિતાય તુભ્યં સદા ભક્તકૃપાપરાય ॥ ૨૬૦॥ ૧॥

નમો ભવાયાસ્તુ ભવોદ્ભવાય નમોઽસ્તુ તે ધ્વસ્તમનોભવાય ।
નમોઽસ્તુ તે ગૂઢમહાવ્રતાય નમોઽસ્તુ માયાગહનાશ્રયાય ॥ ૧॥

નમોઽસ્તુ શર્વાય નમઃ શિવાય નમોઽસ્તુ સિધ્દાય પુરાતનાય ।
નમોઽસ્તુ કાલાય નમઃ કલાય નમોઽસ્તુ તે જ્ઞાનવરપ્રદાય ॥ ૨॥

નમોઽસ્તુ તે કાલકલાતિગાય નમો નિસર્ગામલભૂષણાય ।
નમોઽસ્ત્વમેયાન્ધકમર્દકાય નમઃ શરણ્યાય નમોઽગુણાય ॥ ૩॥

નમોઽસ્તુ તે ભીમગણાનુગાય નમોઽસ્તુ નાનાભુવનાદિકર્ત્રે ।
નમોઽસ્તુ નાનાજગતાં વિધાત્રે નમોઽસ્તુ તે ચિત્રફલપ્રયોક્ત્રે ॥ ૪॥

સર્વાવસાને હ્યવિનાશનેત્રે નમોઽસ્તુ ચિત્રાધ્વરભાગભોક્ત્રે । સવિનાશનેત્રે
નમોઽસ્તુ ભક્તાભિમતપ્રદાત્રે નમઃ સદા તે ભવસઙ્ગહર્ત્રે ॥ ૫॥

અનન્તરૂપાય સદૈવ તુભ્યમસહ્યકોપાય નમોઽસ્તુ તુભ્યમ્ ।
શશાઙ્કચિહ્નાય સદૈવ તુભ્યમમેયમાનાય નમઃ સ્તુતાય ॥ ૬॥

વૃષેન્દ્રયાનાય પુરાન્તકાય નમઃ પ્રસિધ્દાય મહૌષધાય ।
નમોઽસ્તુ ભક્ત્યાઽભિમતપ્રદાય નમોઽસ્તુ સર્વાર્ત્તિહરાય તુભ્યમ્ ॥ ૭॥
ચરાચરાચારવિચારવર્યમાચાર્યમુત્પ્રેક્ષિતભૂતસર્ગમ્ ।
ત્વામિન્દુમૌલિં શરણં પ્રપન્ના પ્રિયાપ્રમેયં મહતાં મહેશમ્ ॥ ૮॥

પ્રયચ્છ મે કામયશઃસમૃધ્દિં, પુનઃ પ્રભો જીવતુ કામદેવઃ ॥
પ્રિયં વિના ત્વાં પ્રિયજીવિતેષુ ત્વત્તોઽપરઃ કો ભુવનેષ્વિહાસ્તિ ॥ ૯॥

પ્રભુઃ પ્રિયાયાઃ પ્રસવઃ પ્રિયાણાં પ્રણીતપર્યાયપરાપરાર્થઃ ।
ત્વમેવમેકો ભુવનસ્ય નાથો દયાલુરુન્મીલિતભક્તભીતિઃ ॥ ૨૭૦॥ ૧૧॥

ઇતિ મત્સ્યપુરાણાન્તર્ગતા રતિકૃતા શિવસ્તુતિઃ સમાપ્તા ।

(matsyapurANam, 154. 260-270)

Proofread by Jonathan Wiener wiener78 at sbcglobal.net, NA

*Shivastuti by Rati*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*